दिनाङ्कः 13.06.2026

प्रातः - 06:55

<u>प्रधानमन्त्री - स्लोवाक गणराज्यं दौरा</u>

प्रधानमन्त्री नरेन्द्रमोदी श्वः स्लोवाक-गणराज्यं प्रति प्रस्थाष्यति। प्रधानमन्त्री नरेन्द्रमोदी अस्यां यात्रायाम् स्लोवाक-देशस्य प्रधानमन्त्रिणा फिको इत्यनेन सह वार्तालापं करिष्यति तथा च सहकारस्य नूतनान् मार्गान् अन्वेषयिष्यति। प्रवासावधौ प्रधानमन्त्री राष्ट्रपतिना पेलेग्रीनी इत्यनेन सहापि मेलनं करिष्यति। द्वैपाक्षिकव्यापारे निरन्तरवृद्धेः दृष्ट्या प्रधानमन्त्रिणः यात्रायाः महत्त्वं वर्धते, यत् चतुर्विंशत्यधिक द्विसहस्रतमे वर्षे एकबिलियन - यूएस् - डालर - परिमितम् अतिक्रम्य गतवर्षे अष्ट दशमलवोत्तरैक बिलियन्-यूएस्-डालर-परिमितम् आसीत्। अनया यात्रया यूरोपीयसङ्घस्य सदस्यराष्ट्रैः सह सहकारं सुदृढं कर्तुं भारतस्य प्रतिबद्धताम् अपि सुदृढं भविष्यति।

<u>देहरादून - राष्ट्रपति दौरा</u>

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य देहरादून-नगरस्य भारतीय-सैन्य-अकादम्यां पासिङ्ग-आउट-परेड इत्यस्य समीक्षां करिष्यति। अस्मिन् वर्षे पासिङ्ग आउट परेड इतीदं ऐतिहासिकं भविष्यति, यस्मिन् प्रथमवारं महिलाः पुरुषैः सह पथ-सञ्चलनं करिष्यन्ति। अस्मिन् भव्यसमारोहे, पञ्चशततोप्यधिकाः पुरुषाः महिलाः च अन्तिमं पदं स्वीकृत्य भारतीयसेनायां अधिकारित्वेन नियुक्ताः भविष्यन्ति। भारतीय-सैन्य-अकादम्याः पासिङ्ग्-आउट-परेड न केवलं सैन्यपरम्परा अस्ति अपितु राष्ट्रसेवायां समर्पितानां युवाधिकारिणां कृते नूतनयात्रायाः आरम्भोपि अस्ति।

कुमारस्वामी - समिति

केन्द्रीय-गुरू-उद्योग-इस्पात-मन्त्रिणा एच. डी. कुमारस्वामिना उक्तं यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना विनिर्माण-आधारितवृद्धेः, वृत्त्यावसर-निर्माणस्य च विषये अभूतपूर्वं महत्त्वं प्रदत्तम्, येन औद्योगिक-वृद्धिः त्वरिताभवत्, बृहत् वृत्त्यावसराः च कल्पिताः।

जयशंकर - अमरीका विदेशमंत्री

विदेशमन्त्रिणा डा. एस्. जयशङ्करेण अमेरिकादेशस्य विदेशसचिवेन मार्को रुबियो इत्यनेन सह वार्तालापं कृत्वा गल्फ़-प्रदेशे U.S. नौसेनया कृताक्रमणस्य विषये प्रबलं विरोधं प्रकटितं यस्मिन् त्रयः भारतीयाः नाविकाः मृताः। सामाजिकान्तर्जालीये पटले एकस्मिन् लेखे डा. जयशङ्करः अवदत् यत् वाणिज्यिक-नौवहनं विरुद्धं एतादृशानि प्राणघातक-आक्रमाणानि न्यायोचितानि न सन्तीति। ओमन-देशस्य तटे पलाऊ-ध्वजयुक्तस्य एम्. टी. सेटेबेलो-जलयानस्य उपरि अमेरिकादेशस्य आक्रमणे भारतीयदलस्य त्रयः सदस्याः मृताः, येन नवदिल्ल्या तीक्ष्णप्रतिक्रिया प्रदत्ता।

रक्षामंत्री - उन्नतास्त्र प्रणाली

रक्षामंत्री राजनाथसिंहः दृढतया उक्तवान् यत् आपरेशन् सिन्दूर् अभियानस्य समये स्वदेशीय-प्रक्षेपास्त्राणां असाधारणं प्रदर्शनं भारतस्य रक्षा-शोधस्य विकास-पर्यावरणव्यवस्थायाः वर्धमानशक्तेः प्रमाणम् अस्ति। रक्षा-अनुसंधान-विकास-संगठनस्य रक्षा-अनुसंधान-विकास-प्रयोगशालायाम् उन्नतास्त्र प्रणाली परिसरस्य उद्घाटनावधौ रक्षामंत्रिणा उक्तं यत् शान्त्यै शक्तेः आवश्यकता अस्ति तथा च तस्याः शक्तेः सर्वाधिकः विश्वसनीयाधारः आत्मनिर्भरता एवास्ति।

## <u>ऋतुविभागः</u>

दिल्ली-एन्. सी. आर्. क्षेत्रे गतरात्रौ निरन्तरं द्वितीयरात्रौ प्रचण्डवृष्टिः अभवत्, वृष्ट्या सह मेघगर्जनम्, तीव्रवायुः, विद्युद्योतनं चाभवत्। भारत-ऋतु-विभागेन दिल्ल्याः तथा समीपस्थानां क्षेत्राणां कृते रेड्-अलर्ट्-इति रक्त वर्णीया सञ्चेतना प्रसारिताऽस्ति। आई. एम्. डी. इत्यनेन सावधानं कृतम्, यत् आर्द्रकालः अनुवर्तयितुं शक्यते। अग्रिमेषु कतिपयेषु दिनेषु मेघ वृष्टिः निरन्तरं भवितुम् अर्हति।

## <u>क्रिकेट</u>

क्रिकेट्-क्रीडायां, अद्य हिमाचलप्रदेशस्य धर्मशालायां तिसृणां ओडिआई क्रीडाणां श्रृङ्खलायाः प्रथमायां क्रीडायां भारतं अफगानिस्तान्-दलं सम्मुखी करिष्यति। भारतीयसमयानुसारम् अपराह्णे सार्धैक वादने क्रीडायाः आरम्भः भविष्यति।